नवमः पाठः

# भव्या भागीरथी

D723QG



हिमाद्रेः सम्भूता विहरसि तदङ्के हिममये,

ततो भूमिं याता विचरसि सुहासा समतले।

पुनासि त्वं लोकान् प्रवहसि समुद्रं प्रति सदा,

अहो दिव्ये गङ्गे! भवतु सुखदं नस्तव जलम्।।1।।

न जाने किं पुण्यं फलितमधुना नो भगवति,

प्रियो देशो जातः तव जलकणैर्नष्टकलुषः।

हरिद्वारं काशी तव तटमहत्त्वं कथयतः,

प्रयागस्तीर्थानां पतिरतुलनीयस्तव तटे ।।2।

।

जनानां धात्री त्वं सुमधुर-फलान्नानि ददती,

विशालां सिञ्चन्ती मधुमयजलैर्भारतभुवम्।

अये शुभ्र्र गङ्गे ! विलसिततरङ्गे ! त्रिपथगे!

तवोत्सङ्गे धन्याः शिशव इव खेलन्ति मनुजाः।।3।।

पयस्ते कुल्याभिव्रजति बहु दूरं सुमधुरम्,

ततः सिक्तं क्षेत्रं भवति हरितं चापि ललितम्।

गभीरे ते नीरे तरणिषु सुखं यान्ति पथिकाः,

वयं भूयो भूयो जगति तव कृत्यैरुपकृताः।।4।।

अये पुण्ये गङ्गे !जगति जननं चेन्मम पुनः,

भवेत् क्रीडाभूमिः पुनरपि शुभा भारतधरा।

सदा सेवे नीरं सुरनदि ! तवेदं सुखकरम्,

न मेऽन्या स्यादीहा तव तटविहारे विहरतः।।5।।

शब्दार्थः

**हिमाद्रेः** = हिमालय पर्वत से । **सम्भूता** = निकली हुई। **सुहासा** = सुन्दर हँसती हुई। **पुनासि** = पवित्र करती हो। **धात्री** = धारण करने वाली। **त्रिपथगे** = तीन मार्गों से जाने वाली (स्वर्गलोक, पृथ्वीलोक तथा पाताललोक मे बहने वाली) गङ्गा। **उत्सङ्गे** = गोद में। **कुल्याभिः** = नहरों से। **व्रजति** = जाती है। **तरणिषु** = नौकाओं में। **ईहा** = इच्छा। **यान्ति** = जाते हैं। **चेत्** = यदि।

## अभ्यासः

### 1. उच्चारणं कुरुत पुस्तिकायां च लिखत-

हिमाद्रेः , तदङ्के . जलकणैर्नष्टकलुषः ,फलान्नानि , मधुमयजलैर्भारतभुवम् , तवोत्सङ्गे , कुल्याभिव्रजति , क्रीडाभूमिः , कृत्यैरुपकृताः

### 2. एकपदेन उत्तरत -

(क) गङ्गा कुतः सम्भूता ?

(ख) तीर्थानां पतिः कः ?

(ग) गङ्गायाः पयः काभिः बहुदूरं व्रजति ?

(घ) गङ्गायाः गभीरे नीरे तरणिषु के सुखं यान्ति ?

(ङ) भागीरथी कान् पुनाति ?

### 3. पूर्णवाक्येन उत्तरत -

(क) गङ्गातटे कानि प्रसिद्धानि नगराणि स्थितानि ?

(ख) गङ्गा-जलात् सिक्तं क्षेत्रं कीदृशं भवति ?

(ग) गङ्गा कीदृशैः जलैः भारतभुवम् सिञ्चति ?

(घ) भागीरथ्याः उत्सङ्गे के शिशवः इव खेलन्ति ?

**4. अधोलिखित-पदेषु सन्धि-विच्छेदं कुरुत -**

मेऽन्या = ..... + ......

तवोत्सङ्गे = ....... + ....

मधुमयजलैर्भारतभुवम् = ........ + .....

तवेदम् = .....+ ......

**5. संस्कृतभाषायाम् अनुवादं कुरुत -**

(क) गंगा सभी नदियों में श्रेष्ठ है।

(ख) इसका जल शीतल एवं पवित्र है।

(ग)पर्यटक गंगा में नौका विहार करते हैं।

(घ) गंगा-तट पर बैठकर लोग तप करते हैं।

(ङ) वाराणसी में गंगा का तट बहुत सुन्दर है।

**6- रेखाङ्कित-पदानि आधृत्य प्रश्न-निर्माणं कुरुत -**

(क) गङ्गा हिमाद्रेः सम्भूता।

(ख) गङ्गा लोकान् पुनाति ।

(ग) हरिद्वारं काशी तव तटमहत्त्वं कथयतः।

(घ) पयस्ते कुल्याभिः व्रजति।

**7. अधोलिखित-पदान् समानार्थक-पदैः सह योजयत -**

गङ्गा हिमगिरिः

हिमालयः जलधिः

समुद्रः वारि

जलम् जाह्नवी

**शिक्षण-सङ्केतः**

*(1) गङ्गायाः उत्पत्तिस्तथा तस्याः धरायाम् अवतरणवृत्तान्तं छात्रान् बोधयत।*

*(2) गङ्गामाधारीकृत्य प×च संस्कृत-वाक्यान् लेखनाय प्रेरयत।*

*(3) गङ्गायाः निर्मलीकरणाय प्रवर्तमानाः योजनाः अधिकृत्य चर्चा करणीय।*

**एतदपि जानीत-**

*जलाशयानां नामानि-*

**सिन्धुः=**समुद्र **अल्पसरम्=**तलैया

**नदी**=नदी**तडागः**=तालाब

**कुसरित**=छोटी नदी**कूपः**=कुँआ

**कुल्या**=नहर **निर्झरः**=झरना

**पल्लवलम्=**पोखरा **कासारः**=झील